॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ४८

सीतां तु रुदतीं दृष्ट्वा ये तत्र मुनिदारकाः ।
प्राद्रवन्यत्र भगवानास्ते वाल्मीकिरग्र्यधीः ॥ १॥

अभिवाद्य मुनेः पादौ मुनिपुत्रा महर्षये ।
सर्वे निवेदयामासुस्तस्यास्तु रुदितस्वनम् ॥ २॥

अदृष्टपूर्वा भगवन्कस्याप्येषा महात्मनः ।
पत्नी श्रीरिव संमोहाद्विरौति विकृतस्वरा ॥ ३॥

भगवन्साधु पश्येमां देवतामिव खाच्च्युताम् ।
न ह्येनां मानुषीं विद्मः सत्क्रियास्याः प्रयुज्यताम् ॥ ४॥

तेषां तद्वचनं श्रुत्वा बुद्ध्या निश्चित्य धर्मवित् ।
तपसा लब्धचक्षुष्मान्प्राद्रवद्यत्र मैथिली ॥ ५॥

तं तु देशमभिप्रेत्य किं चित्पङ्क्तयां महामुनिः ।
अर्घ्यमादाय रुचिरं जाह्नवी तीरमाश्रितः ।
ददर्श राघवस्येष्टां पत्नीं सीतामनाथवत् ॥ ६॥

तां सितां शोकभारार्तां वाल्मीकिर्मुनिपुङ्गवः ।
उवाच मधुरां वाणीं ह्लादयन्निव तेजसा ॥ ७॥

स्नुषा दशरथस्य त्वं रामस्य महिषी सती ।
जनकस्य सुता राज्ञः स्वागतं ते पतिव्रते ॥ ८॥

आयान्त्येवासि विज्ञाता मया धर्मसमाधिना ।
कारणं चैव सर्वं मे हृदयेनोपलक्षितम् ॥ ९॥

अपापां वेद्मि सीते त्वां तपो लब्धेन चक्षुषा ।
विशुद्धभावा वैदेहि साम्प्रतं मयि वर्तसे ॥ १०॥

आश्रमस्याविदूरे मे तापस्यस्तपसि स्थिताः ।
तास्त्वां वत्से यथा वत्सं पालयिष्यन्ति नित्यशः ॥ ११॥

इदमर्घ्यं प्रतीच्छ त्वं विस्रब्धा विगतज्वरा ।
यथा स्वगृहमभ्येत्य विषादं चैव मा कृथाः ॥ १२॥

श्रुत्वा तु भाषितं सीता मुनेः परममद्भुतम् ।
शिरसा वन्द्य चरणौ तथेत्याह कृताञ्जलिः ॥ १३॥

तं प्रयान्तं मुनिं सीता प्राञ्जलिः पृष्ठतोऽन्वगात् ।
अन्वयाद्यत्र तापस्यो धर्मनित्याः समाहिताः ॥ १४॥

तं दृष्ट्वा मुनिमायान्तं वैदेह्यानुगतं तदा ।
उपाजग्मुर्मुदा युक्ता वचनं चैदमब्रुवन् ॥ १५॥

स्वागतं ते मुनिश्रेष्ठ चिरस्यागमनं प्रभो ।
अभिवादयामः सर्वास्त्वामुच्यतां किं च कुर्महे ॥ १६॥

तासां तद्वचनं श्रुत्वा वाल्मीकिरिदमब्रवीत् ।
सीतेयं समनुप्राप्ता पत्नी रामस्य धीमतः ॥ १७॥

स्नुषा दशरथस्यैषा जनकस्य सुता सती ।
अपापा पतिना त्यक्ता परिपाल्या मया सदा ॥ १८॥

इमां भवत्यः पश्यन्तु स्नेहेन परमेण ह ।
गौरवान्मम वाक्यस्य पूज्या वोऽस्तु विशेषतः ॥ १९॥

मुहुर्मुहुश्च वैदेहीं परिसान्त्व्य महायशाः ।
स्वमाश्रमं शिष्य वृतः पुनरायान्महातपाः ॥ २०॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com